अध्याय :- १६ Chapter-16

तारक उवाच ।।
राज्येन बुद्बुदाभेन स्त्रीभिरक्षैश्च पानकैः ।।
मोहितो जन्म लब्धवात्र त्यजते पौरुषांनरः ।। १

जन्म तस्य वृथा सर्वमाकल्पातं न संशयः ।। २

मातापितृभ्यां न करोति कामान्बन्धून शोकानून
करोति यो वा ।
कीर्तिं हि वा नार्जयते न मानं नरः स जातोऽपि
मृतोऽत्र लोके ।। ३

तस्माज्जयामरपंगवानां त्रैलोक्यलक्ष्मी हरणाय शीघ्रम ।
संयोज्यतां मे रथमष्टचक्रं बलं[१]च[२] मे दुर्जयदैत्यचक्रम ।। ४

ध्वजं च मे कांचनपट्टबन्धं छत्रं च मे मौक्तिक जालबद्धम् ।
आद्याहमासां सुरकामिनीनां धम्मिल्लकांश्चा ग्रंथितान्करिष्ये।। ५

यथा पुरा मर्कटको जनन्यास्तस्याश्च सत्येन[३] तु
तारकः स्याम्[४]।। ६

नारद[५]उवाच ।।
तारकस्य वचः श्रुत्वा ग्रसनोनाम दानवः ।
सेनानीर्दैत्यराजस्य तथा चक्रेऽविलंबितम् ।। ७

---

१ ब. जलं २ अ. प्रतौ श्लोकार्ध नष्टम् । (मे...चक्रम्)
३ ब. सत्योन ४ ब. तस्यां
५ ब. श्री नारद

आहत्य भेरीं गम्भीरां दैत्यानाहूय सत्वरः ।
सज्जं चक्रे रथं दैत्यो दैत्यराजस्य धीमतः ।। ८

गरुडानां सहस्रेण गरुडोपमितत्विषा ।
ते हि पुत्राः सुपर्णस्य संस्थिता[1] मेरुकन्दरे ।। ९

विजित्य दैत्यराजेन वाहनत्वे प्रकल्पिताः ।
अप्यष्टचक्रः सरथश्चतुर्योजनविस्तृतः ।। १०

नानाक्रीडागृहयुतो गीतवाद्य मनोहरः ।
गंधर्वनगराकारः संयुक्तः प्रत्यदृश्यत ।। ११

आजग्मुस्तत्र दैत्याश्च दश चंडपराक्रमाः ।।
* कोटिकोटिपरीवारा अन्ये च बहवो रणे ।। १२

तेषामग्रेसरो जम्भः कुजम्भोनंतर स्तथा ।
महिषः कुञ्जरो मेषाः कालनेमिर्निमिस्तथा ।। १३

मथनो जंभकः शुम्भोदैत्येंद्रा दश नायकाः ।
दैत्येंद्रा गिरिवर्ष्माणः संति चंडपराक्रमाः ।। १४

---

१ अ. ताः
* अन्ये च बहवो युद्धे कोटिकोट्य सुरैर्वृताः ।
अ प्रतौ इत्ययं भिन्नः पाठः ।

नानाविधप्रहरणा नानाशस्त्रास्त्रपारगाः ।
तारकस्याऽभवत्केतुर्बहुरूपो महाभयः ।। १५

क्वचिच्च राक्षसो घोरः पिशाचध्वांक्षगृधकः ।
एवं बहुविधाकारः स केतुः प्रत्यदृश्यत ।। १६

केतुनामकरेणापि सेनानीर्ग्रसनो बभौ ।
पैशाचं[1] यत्र वदनं जंभस्यासीद्भयस्यमम् ।। १७

खरो विद्युतलांगूलः कुजम्भस्या भवद्ध्वजे ।
महिषास्य च गोमायुः कांतो हैमस्तथा बभौ ।। १८

गृधो वै कुंजरस्यासीन्मेषास्याभूच्च राक्षसः ।।
कालनेमेर्महाकालो निमेरासीन्महातिमिः ।। १९

राक्षसी मथनस्यापि ध्वांक्षी भूजृंभकस्य च ।
महावृकश्च शुम्भस्य ध्वजा एवंविधो बभुः ।। २०

अनेकाकार विन्यासादन्देषां च ध्वजा भवन् ।
शतेन शीघ्रवेगानां व्याघ्राणां हैममालिनाम् ।। २१

---

१ अ. ब. पिशाच

ग्रसनस्य रथौ मुकतौ महामेघरवौ बभौ ।।
शतेन चापि सिंहानां रथौ जंभस्य यौजितः ।। २२

कुंजभस्य[1] रथौ युकतः पिशाचवदनैः खरैः ।
तावद्भिर्महिषास्यौष्टैर्गजस्य च हयैर्युतः ।। २३

मेषास्य द्विपिभिर्भीमैः कुञ्जरैः कालनेमिनः ।
पर्वतं वै समारूढौ निश्चित्य विधूतंगजैः ।। २४

चतुर्दंष्ट्रैर्गंधवद्भिश्चतुर्भिर्मेघसन्निभैः ।
शतहस्तायते कृष्णे तुरंगे हेम[2]भूषणे ।।  २५

सितचामरजालेन शोभितं पुष्प[3]दामनि ।
मथनोनाम दैत्येन्द्रः पाशहस्तो व्यराजत ।। २६

किंकीणीमालिनं चोष्ट्रमारूढो भूच्च जंभकः ।
कालमुंजं[4]महामेघमारूढः शुम्भदानवः ।। २७

अन्ये च दानवा वीरा नानावाहनहेतयः ।
प्रचण्डचित्रवर्माणः कुण्डलोष्णीषा[5]भूषिताः ।। २८

---

१ ब. कुंभजस्य
२ अ. मालिनि
३ अ. ...... दामिनि
४ अ. महामेषा ....
५ अ. भूषणाः

नानाविधोत्तरासंगा नानामाल्यविभूषणाः ।
नानासुगंधगंधाढ्या नानाबंदिशतस्तुताः ।। २९

नानावाद्यपरिस्पंदसाग्रेसर महारथाः ।
नानाशौर्यकथासक्तास्तस्मिन्पैन्ये महारथाः ।। ३०

तद्बलं दैत्यसिंहस्य भीमरूपं व्यदृश्यत[1] ।
[2]भूमिरेणुसमालिंग तुरंगरथपत्तिकम् ।। ३१

स च दैत्येश्वरः क्रुध्यः समारूढो महारथम् ।
दशभिः शुशुभे दैत्यैर्दशबाहुरिवेश्वरः ।।
जगर्दंतु प्रवृतो वा प्रतस्थे/सौ सुरान्प्रति ।। ३२

एतस्मिन्नंतरे वायुर्दैधदूतः सुरालयम् ।
दृष्ट्वातदानव बलं जगामेंद्रस्य शांसितुम् ।। ३३

स गत्वा तु सभां दिव्यां महेंद्रस्य महात्मनः ।
शशंस मध्ये देवानामिदं कार्यमुपस्थितम् ।। ३४

तच्छ्रुत्वा देवराजः स निमीलित विलोचनः ।
बृहस्पतिमुवाचेदं [3]वाक्यं काले महा[4]मतिः ।। ३५

---

१ ब. ते

२ अ. "भूरेणु" इतिस्यात् ।

३ अ. कालेवाक्यं

४ ब. मतिम्

इन्द्र उवाच ।।[1]
संप्राप्तो/तिविमर्दा/यं देवानां दानवैः सह ।
कार्यं किमत्र तद्ब्रूहि नीत्युपायोपबृंहितम् ।। ३६

एतच्छ्रुत्वा च वचनं महेन्द्रस्य गिरांपतिः ।
प्रत्युवाच महाभागो बृहस्पतिरुदारधीः ।। ३७

बृहस्पतिरुवाच।।[2]
सामपूर्वं स्मृता नीतिश्चतुरंगामनीकिनीम् ।
जिगीषतां सुरश्रेष्ठ स्थितिरेषा सनातनी ।। ३८

सामदानं च भेदश्च चतुर्थो दण्ड एव च ।।
नीतौ क्रमात्प्रयोज्याश्च देशकाल विशेषतः ।। ३९

तत्र साम प्रयोक्तव्यमार्येषु गुणवत्सु च ।
दानं लब्धेषु भेदश्च शंकितेष्विति निश्चयः ।। ४०

दण्डश्चापि प्रयोक्तव्य नित्यकालं दुरात्मसु ।
साम दैत्येषु नैवास्ति निर्गुणत्वादुरात्मसु ।। ४१

श्रिया तेषां च किं कार्यं समृद्धानां तथापि[3]यत् ।
जातिधर्मेण चाभेद्या विधातुरपि ते मताः ।। ४२

---

१ अ. प्रतौ नास्ति ।
२ अ. प्रतौ नास्ति ।
३ अ. तदापि । ब. तवापि ।

एको ह्युपायो दंडो/त्र भवतां यदि रोचते ।
दुर्जनः सुजनत्वाय कल्पैते न कदाचन ।। ४३

लालितः पालितो *[1]वापि स्वस्वभावं न मुंचति ।
एवं मे मन्यते बुद्धिर्भवतो मद्धवस्यताम् ।। ४४

एवमुक्तः सहस्त्राक्षः एवमेवेत्युवाच ह ।
कर्तव्यतां च संचिंत्य[2] प्रोवाचामरसंसद्धि ।। ४५

बहुमानेन मे वाचं श्रृणुध्वं नाकवासिनः ।। ४६

भवंतो यज्ञभोक्तारः सतामिष्टाश्च सात्त्विकाः ।
स्वे स्वे पदे स्थिता नित्यं जगतः पालनैरताः[3] ।। ४७

भवतां च निमित्तेन बाधंते दानवेश्वराः ।
तेषां सामादि नैवास्ति दंड एव विधीयताम् ।। ४८

क्रियतां समरे बुद्धिः सैन्यं संयोज्यतामिति ।
आवाह्यतां च शस्त्राणि च पूज्यं तां शस्त्रदेवताः ।। ४९

---

* १ "वाकिंश्वास्वभावं विमुंचति" अ पाठः ।
२ ब. चिंत्य
३ ब. रेताः

इत्युक्त्वाः समनदर्यंत देवानां ये[1] प्रधानतः ।।
वाजिनामयुतेनाजौ हमपट्टपरिष्कृताः ।। ५०

२ *वाहनानि विमानानि योजयंतु ममामराः ।
यमं सेनापतिं कृत्वा शीघ्रं निर्यांति देवताः ।। ५१

नानाश्चर्यगुणोपेता दुर्जया देवदानवैः ।
रथो मातलिना युक्तो महेन्द्रस्याप्यदृश्यत ।। ५२

यमो महिषमास्थाय सेनाग्रे समवर्तत ।
चंडकिंकिणिवृंदेन सर्वतः परिवारितः ।। ५३

कल्पकालोज्ज्वलापूरितांबरगोचरः ।
[3]हुताश डरणारूढः शक्तिहस्तो व्यवस्थितः ।। ५४

पवनो(कुशपाणिस्तु विस्तारितमहाजवः ।
महारुक्षं समारूढः सेनाग्रे समदृश्यत ।। ५५

भुजगेन्द्रं समारूढो जलेशो भगवान्स्वयम् ।
महापाशधरो वीरः सेनायां[4] समवर्तत ।। ५६

---

१. अ. प्रतौ "ये" नास्ति ।
२ * "वाहनानि..... देवताः । अ. प्रतौ इत्यंय पाठःनास्ति
३ "हुताशनः श्रुकारूढः" अ. ब. पाठः ।
४ ब. सनायां

नरयुक्ते रथे दिव्ये धनाध्यक्षो व्यचीचरत् ।[१]
महासिंहरवो युद्धे गदाहस्तो व्यवस्थितः ।। ५७

राक्षसेशो/थ[२] निर्ऋतीरथे रक्षोमुखैर्वृतैः ।
धन्वी रक्षोगणवृतो महारावो व्यदृश्यत ।। ५८

चंद्रादित्यावश्विनौ च वसवः साध्यदेवताः ।
विश्वे देवाश्च रुद्राश्च सन्नध्यास्तस्थुरावहे ।। ५९

हेमपीठोत्तरासंगाश्चित्रवर्मायुधध्वजाः ।
गंधर्वाः प्रत्यदृश्यन्त कृत्वा विश्वावसुं मुखे ।। ६०

तथारक्तोत्तरासंगा निर्मलायोविभूषणाः ।
गृध्रध्वजाश्च अदृश्यंत राक्षसा रक्तमूर्धजाः[३]।। ६१

तथाभीमाशनिकराः कृष्णवस्त्रा महारथाः ।
यक्षास्तत्र व्यदृश्यंत मणिभद्रादिकोटिशः ।। ६२

ताम्रोलूकध्वजा रौद्रा द्वीपिचर्मांबरास्तथा ।
पिशाचास्तत्र राजंते महावेगपुरः सराः ।। ६३

---

१ अ. वियच्चरे । ब. व्यवीय च ।
२ अ. "राक्षसेशोहि । ब. ऋक्षसेशोथ ।
३ ब. मूध्वजा ।

तथैव श्वेतवसनाः सितवद्रूपताकिनः ।
मत्तेभवाहनप्रायैः[1] किंनरास्तस्थुराहवे ।। ६४

मुक्ताजालैः परिष्कारी हंसो हारसमप्रभः ।
केतुर्जलेधिनाथस्य सौम्यरूपो व्यराजत ।। ६५

पंचरागमहारत्नविटंको धनदस्य च ।
ध्वजः समुत्थितो भातियातुकाम इवांबरम् ।। ६६

कार्ष्णं[2] लोहमयो ध्वांक्षो यमस्याभून्महाध्वजः ।।
राक्षसेस्य वदनं प्रेतस्यध्वज आबभौ ।। ६७

हेमसिंहध्वजौ देवौ चन्द्रार्कवमितद्युती ।
कुंभेन चित्रवर्णेन केतुराश्विनयोरभूत् ।। ६८

मातंगो हेमचित्रविचित्ररत्नपरिष्कृतः ।
ध्वजः शतक्रतोरासीत्सितचामरसं[3]स्थितः ।। ६९

अन्येषां च ध्वजास्तत्र नानारूपा बभूरणे ।
सनागयक्षगंधर्वमहोरग निशाचरा[4] ।। ७०

---

१ अ. प्रायः
२ ब. लोभमयो
३ अ. संहितः ।
४ ब. चर ।

सैना सा देवराजस्य दुर्जया प्रत्यदृश्यत ।
कोटयस्तास्त्रय_स्त्रिंशन्नानादेवनिकायिनाम् ।। ७१

हैमाचलाभे[१] सितकर्णचामरे सुवर्णपद्मामलसुंदरस्रजि ।।
कृताभिरामोज्ज्वल कुंकुमांकरे कपोललीला विध्विमुक्तरावे[२]।। ७२

श्रितस्तदैरावण नामकुंजरे महाबलश्चित्र विशेषितांबरः ।
विशालवज्रांगवितानभूषितः प्रकीर्णकियुरभुजाग्रमंडलः ।। ७३

सहस्रदृग्वंदिसहस्त्रसंस्तुतस्त्रिविष्टपे शोभत पाकशासनः ।। ७४

[३] इति श्री स्कंदपुराणे......... तारकासुर देवेन्द्रयुद्धोपक्रम
वर्णनं नाम षोडशोऽध्यायः ।।

---

१ अ. हिमाचला
२ अ..... रावके ।
३ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे कुमारेश माहात्म्ये देवासुर-
सैन्ययोः समागमः ।
ब. इति श्री स्कंद पुराणे कुमारिकाखंडे षोडशोऽध्यायः ।।१६।।